# ब्रह्माण्डमण्डलपरिज्ञानम्

**डॉ. रामदेव साहू**
प्रोफेसर एवं विभागाध्यक्ष (वेदविज्ञान)
विश्वगुरुदीप आश्रम शोध संस्थान, जयपुर (राज.)

अस्मिन् ब्रह्माण्डे ! त्रीणि मण्डलानि सन्ति - आध्यात्मिकं मण्डलम्, आधिभौतिकं मण्डलम् आधिदैविकं मण्डलं च। सर्वप्रथमम् आधिदैविकप्रपञ्चेन आधिभौतिकस्य प्रपञ्चस्य उत्पत्तिर्भवति। ततः आधिभौतिका-धिदैविकसम्मिश्रणेन अध्यात्मप्रपञ्चस्य विकासो भवति। उपर्युक्तेषु एतेषु त्रिषु मण्डलेषु मूलभूतम् आधिदैविकं मण्डलं पञ्चमण्डलात्मकमस्ति। अतएव सर्वमिदं वस्तुजातं प्रपञ्च इत्याख्यायते। आधिदैविकान्तर्गतानि तानि पञ्चमण्डलानि सन्ति - प्राणः आपः वाक् अन्नम् अन्नादश्च। प्रारम्भे आधिदैविकं मण्डलमिदं ब्रह्माण्डस्य शब्दस्पर्शरूपरसगन्धरहितां स्थितिमाचष्टे। एषां शब्ददिविषयाणामभावेऽपि एकं मौलिकं तत्त्वं अविद्यत प्राणबीजभूतम्। तद्धि 'ऋषि' शब्देन व्यवह्रियते। यथोक्तं शतपथब्राह्मणे -

'असद्वा इदमग्र आसीत्। तदाहुः - किं तदसदासीदिति ? ऋषयो वाव तदग्रेऽसदासीदिति। तदाहुः - के ते ऋषय इति? प्राणा वा ऋषयः। ते यत् पुराऽस्मात् सर्वस्मादिदमिच्छन्तः श्रमेण तपसा अरिषँस्तस्माद् ऋषयः इति।'[1]

अत्रोक्तं यत् सृष्टेः प्राक् असदात्मकः सर्वजगत्प्रभवप्रतिष्ठापरायणभूतः कश्चित् तत्त्वविशेष आसीत्। स एव प्राणः। यस्मिन् वस्तुनि प्राणो वसति तद् वस्तु 'सत्' शब्देनोच्यते। प्राण एव सत्त्वमाचष्टे। सतः पूर्वावस्थायां विद्यमानत्वात् प्राणः एव असत्'शब्देनात्र संकेतितः। अर्थात् पदार्थानामस्तित्वप्राप्तेः पूर्वं तदस्तित्वकारि तत्त्वं प्राणः आसीत्। स च पदार्थाभावे स्वास्तित्वं द्योतयितुमक्षम एवासीत्। अतएव 'असत्' इति शब्देनोक्तम्। अपि चैवमपि वक्तुं शक्यते यत् प्राणतत्त्वमिदं पदार्थवत् प्रतीयमानं नासीत्। प्रतीत्यभावे विद्यमानस्यापि तस्यासदिति संज्ञाऽऽसीत्। इदमेव प्राणमण्डलं स्वयम्भूमण्डलमप्युक्तम्। यतो हि प्राणतत्त्वमिदं स्वयम् भवति। अतएवायमेव स्वयम्भूःकथ्यते। अस्यैवापरं नाम हिरण्यगर्भः। उक्तं च 'हिरण्यगर्भः समवर्तताग्रे भूतस्य जातःपतिरेक आसीद्' इति।

अनेनैव प्राणात्मकेन स्वयम्भुवा सर्वप्रथमम् अबुत्पत्तिः क्रियते। तत्कथमिति चेदुच्यते सर्वप्रथमं प्राणतत्त्वामिदं 'एकोऽहं बहु स्याम्' इत्याकारकेण स्वान्तर्गूढेच्छाशक्तिबलेन आनन्त्यमुपयाति। आनन्त्ये सति तेषु प्राणेषु द्वैधीभावः समुत्पद्यते - सजातीयत्वं विजातीयत्वं च । ततो विजातीयेषु अनन्तप्राणेषु केन्द्रे घर्षणात् अबुत्पत्तिः सम्भवति। घर्षणाधीनत्वात् एभ्यः ऋषिप्राणेभ्यः आपो धाराः सर्वतः प्रस्त्रवन्ति। अस्मिन् विषये भगवतो मनोर्वचनानि प्रमाणानि सन्ति-

**''ततःस्वयंभूर्भगवान् अव्यक्तो व्यञ्जयन्निदम्।**
**महाभूतादिवृत्तौजाः प्रादुरासीत्तमोनुदः।।**

**योऽसावतीन्द्रियग्राह्यः सूक्ष्मोऽव्यक्तः सनातनः।**
**सर्वभूतमयोऽचिन्त्यः स एव स्वयमुद्बभौ।।**

**सोऽभिध्याय शरीरात् स्वात् सिसृक्षुर्विविधाः प्रजाः।**
**अप एव ससर्जादौ तासु बीजमवासृजत्।।''[2]**

अत्र यस्य 'बीज' शब्दस्य प्रयोगो विहितःसः कः इति चेदुच्यते। बीजोऽयं ऋतस्य तन्तुरूपः। उक्तं चाथर्ववेदे - 'परिविश्वा भुवनान्यमृतस्य तन्तुं दृशे कम्।' इति। रीयते प्रस्रवते इति ऋतम् अप् एव। तत्सम्बन्धात् ये तन्तवः बीजरूपाण्याविर्भूतस्ते परमाणव एव। वस्तुतस्त्वेते आधिभौतिकमण्डलस्य बीजानि सन्ति यैरिदं दृश्यमानं जगत् उत्पद्यते। एतान्यपि परमाण्वित्याख्यानि बीजानि प्राणवत् द्विधा सम्भवन्ति सजातीयानि विजातीयानि चेति। ततो विजातीयेष्वनन्तपरमाणुषु केन्द्रघर्षणात् वागुत्पद्यते। सा च प्राणसम्पर्कात्सविशेषा आत्मरूपा वेदसंज्ञाविशिष्टा जायते। एवं स्वायम्भुवाद् हिरण्यगर्भाद् ब्रह्मण एव आध्यात्मिकमण्डलस्याधिष्ठानरूपा वेदोत्पत्तिर्भवति। इदं वेदतत्त्वं प्राथम्येन चतुर्धा विभज्यते। तद्यथा-

1. **ब्रह्मनिश्श्वसितं वेदः** - निश्श्वासः स्पन्दरूपः। स च शाश्वतिकः । अस्य संज्ञा ऋक्। अयं छन्दोवेदः। आत्मनः अच्छादनाय आकृतिमाधातुं तत्परः। तस्मान्मूर्त्तिरित्यप्युक्तः। अनेनैव स्पन्दरूपेण ब्रह्मनिश्श्वसितेन सजीवनिर्जीवपदार्थानामाकृतिधारणं सम्भवति।

2. **ब्रह्मस्वेदो वेदः** - स्वेदो विकारः तेजसः प्रख्यापकश्च। अस्य संज्ञा साम। अयं वितानवेदः। आत्मनो विस्ताराय तत्परः। गृहीताकृतेर्विस्तारोऽनेन सम्भवति। सजीवनिर्जीवपदार्थानां समृद्धिरनेन जायते।

3. **यज्ञमातृको वेदः** - यज्ञः क्रियारूपः स्थितिगतिप्रख्यापकश्च। अस्य संज्ञा यजुः। अयं हि रसवेदः। आत्मनः शक्तिमाधातुं तत्परः। सजीवनिर्जीवपदार्थेषु विविधशक्तीनामुपपत्तिरनेन जायते।

4. **यज्ञनिधानं वेदः** - यज्ञरूपायाः क्रियायाः निधानं नियन्त्रणं तत्प्रख्यापकश्च। अस्य संज्ञा अथर्वः। अयंहि अधिष्ठानवेदः। आत्मानमाधिष्ठापयितुं तत्परः। सजीवनिर्जीव पदार्थेषु ब्रह्मरूपिणः प्राणतत्त्वस्य सत्त्वमनेनैव स्थिरीभवति।

एषु चतुर्षु त्रयाणां विषये तैत्तिरीयब्राह्मणेऽप्युक्तम् -

**''ऋग्भ्यो जातां सर्वशो मूर्त्तिमाहुः**
**सर्वा गतिर्याजुषी हैव शश्वत्।**
**सर्वं तेजः सामरूपं ह शश्वत्**
**सर्वं हीदं ब्रह्मणा हैव सृष्टम्।।''[3]**

स्पष्ट्युत्पत्तौ यजुर्महत्वं स्वीक्रियते। उक्तञ्च - यजुश्च स्थितिगत्यात्मको वेदः। यद्भावो गतितत्त्वं जूभावश्च स्थितितत्त्वम्। यश्च जूश्च यज्जूः। यज्जूरेव परोक्षप्रियाणां देवानां समये यजुः। ऋक्सामे वयोनाधे। यजुश्च वयः। ऋक्सामे यजुरपीतः इति हि अग्निरहस्यविदः प्राहुः। यजुषा एव सर्वा सृष्टिर्विधीयते। उक्तं च - यद्भावो गतिरिति। सैषा गतिः वायुरेव। स्थितिभावश्च आकाशः। तथा चोक्तं श्रुतौ -

**''अयं वाव यजुर्योऽयं पवते। एष हि यन्नैवेदं जनयति। एतं यन्तमिदमनु प्रजायते। तस्माद् वायुरेव यजुः। अयमेवाकाशो जूः यदिदमन्तरिक्षम्। एतं ह्याकाशमनु जवते। तदेतद्यजुर्वायुश्चान्तरिक्षञ्च। यच्च जूश्च। तस्माद्यजुः। तदेतद्यजुर्ऋक्सामयोः प्रतिष्ठितम्। ऋक्सामे वहतः।''[4]**

यजुःरूपिणोर्वाय्वाकाशयोर्यः आकाशः स द्विविधः। अमृताकाशः मर्त्याकाशश्च। अमृताकाश इन्द्रः। तमेतमेवेन्द्रं 'शुनं हुवेम मघवानमिन्द्रम्' इत्यादि रूपेण निरूपयन्ति महर्षयः। 'नेन्द्राद्दूते पवते धाम किंचन' इति मन्त्रेण अमृताकाशात्मक एष इन्द्रः सर्वव्यापकः सिद्ध्यति। एष एव क्रमेण इन्द्रः इन्दरः इत्थरः एवं रूपेण परिवर्तमानः 'ईथर' नाम्ना प्रसिद्धोऽभूत्। अयं हि सर्वेषु प्राणेषु परमाणुषु च प्रविष्टवान्। अनेन ते स्वरूपमापन्नाः। अनेनामृतमयेनेन्द्रेण सह नित्यसम्बद्धा वागेव मर्त्याकाशरूपा। सैषा वाक् इन्द्रपत्नी। 'तस्यैतस्याग्नेर्वागेवोपनिषत्' इति श्रुत्या मर्त्याकाशरूपा इयं वाक् अग्निमयी वर्तते। यत्स्वरूपस्य वायोर्व्यापाराद् एष वाङ् मयोऽग्निरेव अंशात्मना द्रुतो भूत्वा अब्रूपतां भजते। यथोक्तं शतपथ ब्राह्मणे-

**''प्रतिष्ठा ह्येषा यद् ब्रह्म। तस्यां प्रतिष्ठायां प्रतिष्ठितोऽतप्यत। सोऽपोऽसृजत वाच एव लोकात्। वागेव साऽसृज्यत। सा इदं सर्वमाप्नोद्यदिदं किञ्च।यदाप्नोत्तस्मादापः। यदवृणोत् तस्माद्वाः।''[5]**

तदिदं द्वितीयमापोमण्डलं नाम। एतदेव परमेष्ठिमण्डलमित्यप्युच्यते। परमेष्ठिमण्डलीया आपः अम्भः इत्युच्यन्ते। ततश्च तेषामम्भसाम् अपां घर्षणेन तस्मिन्नापोमये सरस्वान्नामके महासमुद्रे अप्परमाणवो यज्ञवराहमूर्त्तिना वायुना क्रमेण घनीभूताः सन्तः समुद्रकेन्द्रे प्रज्वलिता भूत्वा मण्डलाकारतां भजन्ते। तृतीयञ्च वाङ्मण्डलम्। सूर्यमण्डलात्मिकया वाचा ऋग्यजुःसामात्मिकायाः त्रयीविद्यायाः प्रादुर्भावो भवति। स एष ब्रह्मनिश्श्वसितवेदाद् भिन्नो गायत्रीमातृको वेदः। वेदोपादानतयैव एषा सौरी वाक् वेदानां माता उच्यते। यथोक्तं तैत्तिरीय ब्राह्मणे -

**''वागक्षरं प्रथमजा ऋतस्य**

**वेदानां माता अमृतस्य नाभिः।**

**सा नो जुषाणोपयज्ञमागा-**

**दवन्ती देवी सुहवा मेऽस्तु।।''[6]**

तदनन्तरं सौररश्मिघर्षणात् पुनः द्वितीयाः आप उत्पद्यन्ते। ता एताः सूर्यमण्डले व्याप्ता आप एव मरीचय उच्यन्ते। ततस्तु तेषामपि मरीचिसंज्ञकानामपां घर्षणेन तस्मिन् सौरमण्डलस्थे आपोमये अर्णवनाम्ना प्रसिद्धे अपां समुद्रे रुद्राग्निः प्रविशति। रुद्राग्नेस्तत्र प्रवेशाद् रासायनिकप्रक्रियया क्रमशःआपः - फेनः - उषः - सिकता - शर्करा - अश्मा - अयस् - हिरण्यम् इत्यष्टव्याहृत्यात्मकं पृथिवीमण्डलमुत्पद्यते। अर्थात् अबग्निसंयोगाद् अपां शैत्यनाशाद् अग्नेश्च तापक्षयात् तृतीयम् अनुष्णाशीतं द्रव्यम् उत्पद्यते। तदेव पृथिवीमण्डलमुच्यते। पृथिव्या अष्टव्याहृत्यात्मकादेव गायत्री अष्टाक्षरा उच्यते। शब्दरूपगायत्रीछन्दःसादृश्यात् पृथिवीमण्डलमपि गायत्रीशब्देनाचक्षते वैज्ञानिकाः। यथोक्तं शतपथब्राह्मणे -

**''देवाश्च वा असुराश्च उभये प्राजापत्याः पस्पृधिरे। तान् स्पर्धमानान् गायत्री अन्तरा स्थ। या वै सा गायत्री आसीत् - इयं वै सा पृथिवी। इयं हैव तदन्तरा तस्थौ। ''[7]**

पृथिवीगर्भस्थोऽमृताग्निरेव अन्तरिक्षे सर्वतो व्याप्तं सोमात्मकमन्नं भक्षयति। एतेनैव च सोमाहुतिस्वरूपयज्ञेन केन्द्रे प्रतिष्ठितः सन् अमृताग्निरूपः प्रजापतिः अस्य पृथिवीमण्डलस्य रक्षां करोति। पृथ्वीमण्डलस्थोऽयमृताग्निरेव समेषां सजीवनिर्जीवपदार्थानां विश्वस्य च योनिः (उत्पत्तिस्थानम्)। अतएवोक्तम् -

**'' तस्य योनिं परिपश्यन्ति धीरास्तस्मिन् ह तस्थुर्भुवनानि विश्वा''[8]**

पृथिवीपिण्डस्थोऽमृताग्निस्वरूपोऽयं प्रजापतिः सोमान्नं भक्षयति। अतएव इदं पृथिवीमण्डलं शरीरशारीरयोरभेदाद् अन्नादमण्डलमुच्यते। यः खलुभोक्ता स एव अन्नादः। तदिदं चतुर्थमन्नादमण्डलं नाम। तदनन्तरं पृथिवीमण्डलस्थात् अत्रिनेत्रात् अर्थात् पारदर्शित्वप्रतिबन्धकात्रिप्राणात् सोमस्योत्पत्तिर्जायते। उक्तञ्च ब्रह्माण्डपुराणे -

**''ऊर्ध्वमाचक्रमे तस्य सोमत्वं भावितात्मनः।**

**नेत्राभ्यामस्त्रवत्सोमो दशधा द्योतयन् दिशः।।''[9]**

अयमत्रिप्राणोत्पन्नः पृथ्वीमण्डलान्तर्वर्त्ती सोम एवान्नबीजम्। अनेनैव अन्नानि ओषधयो वनस्पतयश्चोत्पद्यन्ते। तस्मादिदमन्नमण्डलमुच्यते। चन्द्रमा अस्य प्रतिनिधिः। स देवानामन्नम्। सोममयत्वाच्चन्द्रमा अपि अत्रिपुत्र एव। विषयेऽस्मिन् सम्प्रोक्तं शतपथब्राह्मणे -

**''ते देवा अब्रुवन् - न वा इममन्यत सोमाद्धिनुयात्। सोममेवास्मै सम्भरामः। तस्मै सोमं समभरत्। एष वै सोमो राजा देवानामन्नं यच्चन्द्रमाः।''**[10]

एवं यानि पञ्चमण्डलानि आधिदैविकानि तान्यधिकृत्य पञ्चदेवताः प्राथम्येन प्रतिष्ठिताः -

स्वयम्भूः (प्रजापतिः प्राणो वा), परमेष्ठी (विष्णुः आपो वा) सूर्यः (इन्द्रः वाग्वा), पृथिवी (अग्निः अन्नादो वा), चन्द्रमाः (अन्नं, सोमो वा) चेति।

एषु स्वयम्भूराकाशत्वेन प्रातिष्ठत। परमेष्ठी वायुत्वेन प्रातिष्ठत। सूर्यस्तेजोमयपिण्डत्वेन प्रातिष्ठत। पृथिवी मृत्पिण्डत्वेन प्रातिष्ठत। चन्द्रमा अप्त्वेन प्रातिष्ठत। पश्चात् भूतपिण्डेष्वपि क्रमशः ब्रह्म-विष्णु-इन्द्र-अग्नि-सोमाख्या पञ्चैवेमा देवताः प्रतिष्ठिता बभूवुः। एता एव यज्ञेन यज्ञमयजन्त। उक्तञ्च शतपथब्राह्मणे दर्शपौर्णमासरहस्ये -

**'ता वा एताः प्रजापतेरधिदेवता असृज्यन्त - अग्निरिन्द्रः सोमः परमेष्ठी प्राजापत्यश्च। स आपोऽभवत्। आपो वा इदं सर्वम्। ता यत् परमे स्थाने तिष्ठन्ति तस्मात् परमेष्ठी नाम। स प्राणोऽभवत्। प्राणो वा इदं सर्वम्। यद्वै किंचप्राणि स प्रजापतिः। सा वागभवत्। वाग्वा इदं सर्वम्। तस्मादाहुरिन्द्रो वागिति। अन्नाद एवाग्निरभवत्। अन्नं सोमः। अन्नादश्च वा इदं सर्वमन्नं च। ता वा एताः पञ्च देवता एतेन कामप्रेण यज्ञेनायजन्त।''**[11]

एता एव क्षरपुरुषस्य पञ्च कला अप्युच्यन्ते। आसां यानि पञ्चमण्डलानि पूर्वोद्दिष्टानि तान्येव कालान्तरे देवताप्राधान्यात् ब्रह्ममण्डलम्, विष्णुमण्डलम्, इन्द्रमण्डलम्, अग्निमण्डलम्, सोममण्डलञ्चेति नामभिरपि प्रसिद्धानि बभूवुः। तत्रोक्तम् - ब्रह्माक्षरमयं ब्रह्म मण्डलं प्राणमयम्। विष्वक्षरमयं मण्डलं परमेष्ठिमण्डलम् आपोमयम्। इन्द्राक्षरमयं सूर्यमण्डलम् वाङ्मयम्। अग्न्यक्षरमयं पृथ्वीमण्डलम् अन्नादमयम्। सोमाक्षरमयं चन्द्रमण्डलम् अन्नमयञ्च।

इत्थं प्राणाब्वागन्नादान्नात्मकानि स्वयम्भू-परमेष्ठि-सूर्य-पृथिवी-चन्द्रेत्येतानि यानि पञ्चमण्डलानि तेषां समष्टिरेव आधिदैविकं मण्डलम्।

**सन्दर्भाः**


1. शतपथब्राह्मण - 6/1/1/1
2. मनुस्मृति - पृ.सं. 168
3. तैत्तिरीयब्राह्मण - 3/12/9/1
4. शतपथब्राह्मण - 10/3/5/1
5. शतपथब्राह्मण - 6/1/7/8
6. तैत्तिरीयब्राह्मण - 2/1/5/1
7. शतपथब्राह्मण - 1/4/3/33
8. मुण्डकोपनिषद् - पृ.सं. 92
9. ब्रह्माण्डपुराणम् - पृ. सं. 285
10. शतपथब्राह्मण - 1/6/4/4
11. शतपथब्राह्मण - 1/1/1/6